अनुक्रमाङ्क ..............................

कूट सं. : 820153-$SA_1$ (W)

कक्षा - अष्टमी

कृपया जाँच कर लें कि इस प्रश्न-पत्र में कुल 20 प्रश्न हैं और कुल 11 मुद्रित पृष्ठ हैं।

# संस्कृतम्

(सङ्कलनात्मकं मूल्याङ्कनम् - I)

निर्धारित-अवधिः - होरात्रयम् पूर्णाङ्काः - 90

निर्देशाः -

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन क्रमे लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।
6. खण्ड सङ्ख्या अपि लेखनीया।

## खण्डः-'क' (अपठित-अवबोधनम्)

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत - 10

भारतवर्षे अनेके महापुरुषाः अभवन्। तेषु महापुरुषेषु महामना पण्डित मदनमोहनः मालवीयः युगपुरुषरुपेण स्मर्यते। अयम् महापुरुषः आधुनिककालस्य महान् शिक्षाविद्, अर्थशास्त्री, विधिवेत्ता, ओजस्वी, वाक्पटुः, आदर्शः अध्यापकः च आसीत्। अस्य जन्म 1861 तमस्य वर्षस्य दिसम्बर मासस्य पञ्चविंशति तिथौ प्रयागराजे अभवत्। अस्य बाल्यकालस्य नाम मदनमोहनः मालवीयः आसीत्। अस्य पितुः नाम पं. ब्रजनाथः आसीत् मातुः च नाम 'मूनादेवी' आसीत्। अस्य महोदयस्य देशस्य राजनीति - धर्म-समाज शिक्षणादि क्षेत्रेषु च महती भूमिका आसीत्। एतत् दृष्ट्वा

महात्मा गान्धी मदनमोहनं मालवीयं 'महामना' इति उपाधिना अलङ्कृतवान्। देशस्य कृते बहु योगदानं दृष्ट्वा भारतसर्वकार: अपि महोदम् अस्मिन् वर्षे अप्रैलमासस्य 30 तिथौ 'भारतरत्न' इति सम्मानेन अलङ्कृतवान्। भारतदेश: सर्वदा अस्य युगपुरुषस्य ऋणी भविष्यति।

प्रश्ना: -

(अ) एकपदेन उत्तरत - $1 \times 2 = 2$

(क) मदनमोहनमालवीयस्य पितु: नाम किम् आसीत्?

(ख) सर्वकार: महोदयं केन सम्मानेन अलङ्कृतवान्?

(आ) एकवाक्येन उत्तरत - $2 \times 2 = 4$

(क) महोदयस्य केषु क्षेत्रेषु महती भूमिका आसीत्?

(ख) क: सर्वदा अस्य युगपुरुषस्य ऋणी भविष्यति।

(इ) निर्देशानुसारम् उचितपदस्य चयनं कृत्वा लिखत। $\frac{1}{2} \times 4 = 2$

(क) 'आदर्श:' इति विशेषणस्य विशेष्यपदं किम्?

(अ) आसीत् (आ) अध्यापक:

(इ) च (ई) ओजस्वी

(ख) 'भविष्यति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) भारतदेश: (आ) सर्वदा

(इ) अस्य (ई) ऋणी

(ग) 'महोदय: आदर्श: अध्यापक: अपि आसीत्' अस्मिन् वाक्ये अव्ययपदं किम्?

(अ) आसीत् (आ) महोदय:

(इ) अपि (ई) अध्यापक:

(घ) 'अस्ति' इति क्रियापदस्य किम् विपरितार्थकं पदम् गद्यांशे प्रयुक्तम्?

(अ) अभवत् (आ) अभवन्

(इ) आसीत् (ई) स्मर्यते

(ई) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत। 2

## खण्डः-'ख' ( रचनात्मक-कार्यम् ) (10)

2. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत- 1×5=5



मञ्जूषा -

| |
|---|
| बसस्थानकम्, उपविष्टं, प्रतीक्षा, बसयानम्, चालकः, |
| जनः, आरोहति, अष्ट, एका महिला, पङ्क्तिबद्धाः |

3. भवान् संजीवः स्वमित्राय नेपाल-भूकम्प-आपद्विषयकं पत्रं लिखति। तस्मिन् पत्रे भवान् तं पीडितानां सहायतार्थं प्रेरयति। भवान् स्वपत्रं मञ्जूषायाः सहायतया पुनः लिखतु। - ½×10=5

प्रिय मित्र दिनेश!

(1) .......................... नमस्कारः

भवान् सम्यक् (2) .......................... एव यत् नेपालदेशे कियती (3) .......................... भूकम्प-आपद् आगता। अतः अस्माकं सर्वेषां (4) .......................... अस्ति यत् वयं धन-वस्त्र-खाद्यान्नतः तेषां (5) .......................... करवाम। अतः (6) ..........................

अपि सहायतार्थं जनान् (7) .......................... यतो हि (8) .......................... कृते वसुधा एव कुटुम्बम् इव भवति। अस्तु (9) .......................... मिलामः।

भवदीयं मित्रम्

(10) ..........................

| मञ्जूषा : | पुनः, जानाति, सहायतां, उदारचरितानां, प्रेरयतु, संजीवः, कर्तव्यम्, सस्नेहं, भीषणा, भवान्। |
|---|---|

**खण्डः-'ग' (अनुप्रयुक्त-व्याकरणम्) (35)**

4. अधोलिखित वाक्येषु रेखाङ्कितपदेषु सन्धि-सन्धिविच्छेदं वा कुरुत - 3

(क) गीता तु गण+ईशम् नमति।

(ख) मासानन्तरम् एकवारं पुनः सः आगतवान्।

(ग) वधूत्सवः शोभनीयः आसीत्।

5. (अ) उचितपदस्य चयनं कृत्वा लिखत। ½×6=3

(क) ...................... सुन्दराणि पुष्पाणि विकसन्ति।

(अ) लताः (आ) लतासु

(इ) लतां (ई) लतया

(ख) मम विश्वासः ...................... अस्ति।

(अ) रामस्य (आ) रामम्

(इ) रामात् (ई) रामे

(ग) ...................... जानन्ति अद्य सोमवासरः अस्ति।

(अ) भवान् (आ) भवन्तं

(इ) भवन्तः (ई) भवता

(घ) राहुलः ..................... अपि हसति।

(अ) गच्छन्तं (आ) गच्छता

(इ) गच्छन् (ई) गच्छते

(ङ) ..................... राजा आम्रम् अस्ति।

(अ) फ़लम् (आ) फ़लानाम्

(इ) फ़लाय (ई) फ़लात

(च) दूषितपदार्थैः ..................... जलं दूषितं भवति।

(अ) नदीनां (आ) नद्यः

(इ) नदीम् (ई) नद्या

(आ) उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत। 1×3=3

(क) त्वं ..................... पाठशालायां पठसि।

(अ) किं (आ) केन

(इ) कस्मिन् (ई) कस्यां

(ख) ..................... गृहम् कुत्र अस्ति?

(अ) तव (आ) तुभ्यं

(इ) त्वयि (ई) त्वाम्

(ग) ..................... श्वः तत्र गमिष्यामः।

(अ) अहम् (आ) वयम्

(इ) यूयम् (ई) आवाम्

6. (अ) कोष्ठके प्रदत्तसङ्ख्यां संस्कृतपदेन रिक्तस्थानेषु लिखत - 1×2=2

(क) मम कक्षायां ..................... (28) छात्राः सन्ति।

(ख) प्रकोष्ठे ..................... (45) जनाः सन्ति।

(आ) उचितं सङ्ख्यावाचकं पदं विकल्पेभ्यः चित्वा लिखत - ½×2=1

(क) वेदाः ..................... सन्ति।

(अ) चतस्रः (आ) चत्वारि

(इ) चतुरः (ई) चत्वारः

(ख) देवालये ..................... महिलाः सन्ति।

(अ) त्रीणि (आ) तिस्रः

(इ) त्रयः (ई) त्रीन्

7. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत - 1×3=3

(क) असत्यम् ..................... वद।

(ख) अद्यत्वे प्रधानमन्त्री महोदयः देशात् ..................... अस्ति।

(ग) ..................... एकः साधुः आसीत्।

मञ्जूषा - | बहिः, मा, एकदा |

8. रेखाङ्कितपदेषु उपसर्गं संयोज्य पृथक् कृत्वा वा लिखत - 1×3=3

(क) यज्ञदत्तः अभिवादनम् करोति।

(ख) संस्कृते उत्+चारणस्य महत्ता अस्ति।

(ग) बालः संगणकम् उपगच्छति।

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत - 1×5=5

(क) रविः लतया सह आपणं गच्छति।

(ख) अलं चिन्तया।

(ग) भिक्षुकः नेत्रेण काणः अस्ति।

(घ) मम गृहम् उभयतः वृक्षाः सन्ति।

(ङ) शिशुः मातरं प्रति गच्छति।

10. समस्तपदानां समासस्य नामानि लिखत - 1×3=3

(क) बालसभा

(ख) देशसेवा

(ग) सीतारामौ

11. विकल्पेभ्यः उचितपदस्य चयनं कृत्वा लिखत - 1×5=5

(क) वयम् अत्रैव .....................।

(अ) स्थास्यामि (आ) स्थास्यावः

(इ) स्थास्यामः (ई) स्थास्यति

(ख) छात्राः यज्ञार्थं .....................।

(अ) गच्छन्ति　　(आ) गच्छति

(इ) गच्छतः　　(ई) गच्छतु

(ग) श्वः आवां मिलित्वा नाटकं .....................।

(अ) द्रक्ष्यसि　　(आ) द्रक्ष्यामि

(इ) द्रक्ष्यावः　　(ई) द्रक्ष्यति

(घ) छात्राः कक्षायाम् एव पाठं .....................।

(अ) स्मरतु　　(आ) स्मरताम्

(इ) स्मरन्तु　　(ई) स्मरसि

(ङ) अत्र तु अनेके जनाः .....................।

(अ) स्तः　　(आ) अस्ति

(इ) अस्तु　　(ई) सन्ति

12. अधोलिखितेषु वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत - 1×4=4

(क) चटका <u>चिन्तयित्वा</u> काकस्य गृहम् गच्छति।

(ख) <u>लिख्+शतृ</u> सः खादति।

(ग) बालिका <u>वि+हस्+ल्यप्</u> वदति।

(घ) उभौ <u>मिलित्वा</u> सुखेन वसतः।

## खण्डः-'घ' ( पठित-अवबोधनम् ) ( 35 )

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म। अनेके भक्ताः तस्य दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म। एकदा एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत्। महात्मा विठोवा तस्य निवेदनं स्वीकृतवान्। सः यदा भोजनाय तस्य जनस्य गृहम् अगच्छत्। सः कपाटम् आवृत्य कुत्रचित् गतः आसीत्। महात्मा विठोवा भोजनम् विना एव कुटीरं प्रत्यागच्छत्। रात्रौ च बुभुक्षितः एव अतिष्ठत्।

(अ) एकपदेन उत्तरत - ½×2=1

(क) कः कुटीरं निर्माय वसति स्म?

(ख) कः कपाटम् आवृत्य कुत्रचित् गतः आसीत्?

(आ) एकवाक्येन उत्तरत - 1×2=2

(क) महात्मा विठोवा किं स्वीकृतवान्?

(ख) कः महात्मानं प्रार्थयत्?

(इ) निर्देशानुसारम् उचितपदस्य चयनं कृत्वा लिखत। 1×2=2

(क) 'एकस्मात्' इति विशेषणस्य विशेष्यपदं किम्?

(अ) नगरात् (आ) बहिः

(इ) निर्माय (ई) वसति स्म

(ख) 'प्रार्थयत्' इति क्रियापदस्य कर्तृपदं किम्?

(अ) नागरिकः (आ) महात्मा

(इ) निर्माय (ई) एकदा

14. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापम्अपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

(अ) एकपदेन उत्तरत - ½×2=1

(क) धियः जाड्यं का हरति?

(ख) सत्संङ्गतिः दिक्षु काम् तनोति?

(आ) एकवाक्येन उत्तरत - 1×2=2

(क) सत्सङ्गतिः किं दूरीकरोति?

(ख) सत्सङ्गतिः केषां सर्वविधं कल्याणं करोति?

(इ) निर्देशानुसारम् उचितपदस्य चयनं कृत्वा लिखत – 1×2=2

(क) 'अवनतिम्' इति पदस्य विलोमपदं श्लोके किम् प्रयुक्तम्?

(अ) उन्नतिम् (आ) जाड्यं

(इ) पुंसाम (ई) सत्संङ्गतिः

(ख) 'प्रसादयति' इति क्रियापदस्य कर्तृपदं किम्?

(अ) चेतः (आ) पुंसाम्

(इ) सत्सङ्गतिः (ई) दिशति

15. अधोलिखितं संवादम् पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

आचार्यः – शोभनम्। अतीव सुन्दरम् आयोजनं कृतम्। अधुना प्रारम्भं कुर्वन्तु।

प्रणवः – संस्कृतम् इति पदस्य कः अर्थः?

विश्वासः – 'शुद्धम्', 'परिष्कृतम्' इति संस्कृतपदस्य अर्थः अस्ति।

सुमेधा – संस्कृतभाषायाः कति रूपाणि सन्ति?

प्रबुद्धः – संस्कृतभाषायाः द्वे रूपे स्तः। एकं वैदिकं संस्कृतम् द्वितीयं च लौकिकं संस्कृतम्।

प्रणवः – वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति?

निष्ठा – चत्वारः वेदाः, ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, उपनिषदः च वैदिकं साहित्यम् कथ्यते।

प्रश्नाः –

(अ) एकपदेन उत्तरत – ½×2=1

(क) 'परिष्कृतम्' इति कस्य अर्थः अस्ति?

(ख) वेदाः कति सन्ति?

(आ) एकवाक्येन उत्तरत – 1×2=2

(क) संस्कृतभाषायाः कति रूपाणि सन्ति?

(ख) वैदिकं साहित्यं किं कथ्यते?

(इ) निर्देशानुसारम् उचितपदस्य चयनं कृत्वा लिखत - 1×2=2

(क) 'समाप्तम्' इति पदस्य विलोमपदं संवादे किम् प्रयुक्तम्?

(अ) परिष्कृतम् (आ) शोभनम्

(इ) प्रारम्भम् (ई) साहित्यम्

(ख) 'अधुना प्रारम्भं कुर्वन्तु' अत्र अव्ययपदम् किम् अस्ति?

(अ) अधुना (आ) प्रारम्भः

(इ) कुर्वन्तु (ई) न कोऽपि

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा भावार्थं लिखत - 1×4=4

(क) 'उदारहृदयानां तु वसुधैव कुटुम्बकम्'

भावः - ये जनाः (अ) ...................... भवन्ति, तेभ्यः (आ) ...................... एव कुटुम्बं भवति।

(ख) 'विद्या ददाति विनयम्'

भावः - विद्या जनेभ्यः (अ) ...................... यच्छति। अतः (आ) ...................... प्राप्य अभिमानं मा कुरुत।

मञ्जूषा - | विनम्रतां, उदारहृदयाः, विद्यां, वसुधा |

17. श्लोकं पठित्वा अन्वयम् उचितपदैः पूरयित्वा लिखत - ½×8=4

(क) सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुखभाग्भवेत्।।

अन्वयः - सर्वे (अ) .................. भवन्तु (आ) .................. निरामयाः सन्तु सर्वे भद्राणि (इ) .................., कश्चित् (ई) .................. मा भवेत्

(ख) गर्जति शरदि न वर्षति वर्षासु निःस्वनो मेघः
नीचो वदति न कुरुते न वदति सुजनः करोत्येव।

अन्वयः - मेघः शरदि (केवलं) (अ) .................. वर्षति न। वर्षासु (सः) (आ) .................. (वर्षति)। नीचो (इ) .................. एव करोति न, सुजनः (ई) .................. वदति न।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत - 1×5=5

(क) एकदा तौ वृक्षे निर्मितम् एकं सुन्दरं गृहम् अपश्यताम्।

(ख) चटका तृणैः स्वगृहं निर्मितवती।

(ग) काकः वृक्षे मृत्तिकया सुन्दरं गृहं निर्मितवान्।

(घ) एकः काकः एका चटका च द्वे मित्रे आस्ताम्।

(ङ) सुन्दरं गृहं दृष्ट्वा तौ अचिन्त्यताम्।

19. अधोलिखितेषु वाक्येषु रेखाङ्क्तिपदानि आधृत्य प्रश्ननिर्माणं कुरुत - 1×5=5

(क) <u>जलस्य</u> अभावात् कृषिः न भवति।

(ख) <u>चटका</u> तृणैः स्वगृहं निर्मितवती।

(ग) <u>जलं</u> प्रदूषितं न करणीयम्।

(घ) कालिदासेन <u>त्रीणि</u> नाटकानि रचितानि।

(ङ) <u>छात्रैः</u> एका प्रश्नोत्तरी आयोजिता।

20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कुरुत - ½×4=2

| | |
|---|---|
| (क) वाचि | बुद्धेः |
| (ख) लक्ष्मीः | भाषते |
| (ग) धियः | श्रीः |
| (घ) वदति | वाण्यां |